International Journal of Scientific Research in Science and Technology
Print ISSN: 2395-6011 | Online ISSN: 2395-602X (www.ijsrst.com)

# अर्थस्य पुरुषार्थत्वविचारः



**साधुः मुनिवत्सलदासः,**
**गुरुवर्याः माधवप्रियदासजीस्वामिनः ,**
**दर्शनम् संस्कृत संस्थानम्- SGVP, Ahmedabad, Gujarat, India**

**Article Info**
Volume 8, Issue 1
Page Number: 249-254

**Publication Issue :**
January-February-2021

**Article History**
Accepted : 23 Jan 2021
Published : 28 Jan 2021

ABSTRACT

चतुर्विधपुरुषार्थेषु अर्थोपार्जनं व्यावहारिक जीवने पारमार्थिकसाधनसिद्धये च आवश्यकम् । विना अर्थं इह लोके किं कर्तव्यम् ? सर्वेऽपि मनुष्याः अर्थोपार्जनाय अहोरात्रं प्रयत्नशीलाः भवन्ति । धर्मेण अर्थो साध्यः न तु अधर्मेण ।

केचन जनाः अर्थप्राप्तये मरणासन्ना भवन्ति । तदुक्तम् आङ्गलभाषायाम् यत् – BURNING DESIRE FOR WEALTH. केषांचित् धनक्षये वर्धति जाठराग्निः । धनप्राप्त्या गर्विष्ठाश्च भवन्ति केचन । धनस्य प्राणतुल्यत्वमुक्तं कूर्मपुराणे यथा – **स तस्य हरते प्राणान् यो यस्य हरते धनम् ।।**[1]

In hinduism, artha is one of the four goals of life, known as purusharthas.

It is considered to be a noble goal as long as it follows the dictates of vedic morality.

The concept includes achieving widespread fame, garnering wealth and having an elevated social standing. It is the second of the four purusharthas. The important thing to remember is not to be attached to the possession or attainment of wealth.

It can be sought with detachment, and with awareness, and when done in this state of mind, the pursuit of wealth is not different from the pursuit of the divine, because one sees abundance, or wealth as a form of the divine. And in this state of detachment, one recognizes when one has attained their financial objectives, and hence the desire to pursue more automatically dies away, paving the way for moksha.

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

जीवनयापनाय अर्थस्यावश्यकता सर्वथा वर्तते । यस्याम् आवश्यकतायां मानवजीवनस्य ऐहिकम् आमुष्मिकञ्च साक्षात् सिद्धयति । जीवनस्य सर्वाण्यपि प्रयोजनानि अर्थमूलानि एव । स एवार्थसंज्ञः वाच्यः अयम् ।

अर्थः मनुजानां भोगारोग्यधर्माणां प्रमुखं प्रयोजनमस्ति । अत एव सर्वेषाम् अर्थं प्रति प्रवृत्तिः स्वाभाविकी एव । यस्य प्राप्त्यर्थं सर्वेऽपि यतन्ते स एव अर्थः ।

मानवानां सुखप्राप्तेः मूलं शास्त्रेषु अर्थः एव निरूपितः । अतः लौकिकवस्तुनः प्राप्तिरपि अर्थद्वारेव सिद्ध्यति । धर्मप्राप्तिरपि अर्थद्वारेव । अत एव आचार्येण कौटिल्येन त्रिवर्गेषु अर्थ एव प्रधानः धर्मकामयोः मूलमिति द्रूतम् ।

कौटिल्यदृष्ट्या अर्थः मुख्यं प्रधानं निमित्तं तत्त्वम् । अतः मनुजानां प्राणीनाञ्च जीवातुभूतं तत्त्वम् अर्थ एव । भूमिः, धनम्, पशुः, मित्रम्, विद्या, कला वा कृषिः एतत्सर्वमपि अर्थे एव नियम्यन्ते । अतः अर्थश्रेण्यामेतेषां सर्वेषां समावेशः सम्यक्तया भवितुमर्हति ।

अतः अभीष्टानां सर्वेषाम् उपायानाम् एकमेव शरणम् अर्थ एव । यतो हि एषः मनुष्यजीवनस्य आवश्यकतापूर्तौ चरमं लक्ष्यम् । अतः एतदपि वक्तुं शक्यते मनुष्यः सकलकामनाप्राप्तौ यत्नशीलः वर्तते । अतः एतासां सर्वासामपि कामनानाम् एकमेव चरमं साधनं एक एव परमोपायः अर्थ एव । अत एव आचार्येण वात्स्यायनेन भणितं स्वर्ण-रजत-धन-धान्य-मित्रार्जनानां सर्वेषां एक एव हेतुः अर्थ एव । अर्जितस्यापि अर्थस्य पुनः वर्धनाय अर्थः सर्वशरण्यः ।

विनाऽर्थं जीवने न कस्यचिदपि उद्यमस्य संभवः । विना शरीरं विना साधनैश्च परमार्थ असम्भव एव । यद्यपि सृष्टौ सर्वेऽपि जीवाः भोजनप्राप्त्यर्थम् अर्थं विन्दन्त्येव परं मनुष्यस्य आर्थिकावश्यकताः सर्वेभ्यः जीवेभ्यः विशिष्टा विलक्षणा च । मनुष्यः भोजन-निवासादिकम् अतिरिच्य ततः अपि धन-धान्यप्राप्त्यर्थं समाजे च स्वशक्तिशालिनत्वम् अर्थमेव उपकरोति ।

सुखप्राप्तेः मनुष्यस्य इच्छा विकासाय च मनुष्यस्य कर्तव्यम् स्वाभाविकं वर्तते । यतोहि सर्वेऽपि जीवाः सुखप्रिया एव । अतः स्थानमिमं द्वेधा विभिक्तुं शक्यते – विषयसुखम् आत्मसुखं च । अनेन च सुखप्राप्त्यर्थम् अस्माकम् अभिलषितं लक्ष्यं तृतीयः पुरुषार्थः कामः वा चतुर्थः पुरुषार्थः मोक्षः ।

निश्चितरूपेण इदमपि वक्तुं शक्यते यत् – जीवने अर्थस्य परमं महत्त्वं चरमाऽवश्यकता वर्तत इति । परं तथापि तदपि निर्देशितं यत् धर्मविरूद्धम् अर्थोपार्जनं न कर्तव्यम् । अत एव रामायण-महाभारत-मनुस्मृत्यादिशास्त्रेषु स्पष्टम् इङ्गितं यत् – धर्मेण अर्जितं धनम् आसक्तिजनकं न स्यात् । अधर्मेण अर्जित अर्थः दुःखस्य, पतनस्य विनाशस्य च कारणम् ।

एषा आसक्तिरेव परमपुरुषार्थस्वरूपस्य मोक्षस्य प्राप्तौ प्रतिबन्धं जनयति । धर्मविपरीतम् अर्थोपार्जनं निन्दनीयं सञ्त्याज्यं च । महात्मना मनुना इदमपि भणितं – धर्मविरूद्धस्य अर्थस्य सर्वथा त्यागः श्रेष्ठः । अर्थोपार्जने धर्मसम्स्तुतिः परमावश्यकी । मोक्षप्राप्त्यर्थम् उक्तानां त्रयाणां पुरुषार्थाणां

संयमनं नियमनञ्च अवश्यं भवेत् । अतः धर्मस्य अर्थस्य च बाधा कामेन स्यात् कामस्य च बाधा धर्मेण स्यात् ।

विस्तृतरूपेण पश्यामश्चेत् भौतिकसंसाधनानां सम्यक् निर्वहणाय अर्थ एव कारणम् । भौतिकसम्साधनानि सम्प्राप्य यदि धर्मः नष्टः चेत् तस्य मोक्षोऽपि अवरुद्ध एव । तत्सिद्ध्यर्थं प्राप्तस्य धनस्य उचिते पात्रे दानं योग्यम् । अर्थम् अतिरिक्तं तत्र सर्वाण्यपि भौतिकसाधनानि सम्मिलितानि सन्ति, येन माध्यमेन मानवः धार्मिकीं, सामाजिकीं स्वाभाविकीञ्च उन्नतिं प्राप्नोति । आपाततः पश्यामश्चेत् नैकमतं विदुषां मतस्योपरि मानवजीवने अर्थस्य भूमिका वास्तविकम् अर्थप्रदानं मोक्षप्राप्तिः च ।

अर्थप्राप्त्यर्थम् अर्थस्य महत्त्वपूर्णलक्ष्यप्राप्त्यर्थञ्च तद्रक्षणाय च सर्वेऽपि जीवाः स्वप्राणान्नपि विनिपाते निक्षेप्यन्ति । सङ्कटग्रस्तकालेऽपि मनुष्यैः धनरक्षा सर्वथा कर्तव्या । अर्थस्याधिकव्ययः धर्मविरूद्धकार्येषु च तद् व्ययोऽपि अर्थस्य परमं दूषणम् । अत एव शुक्राचार्येण शुक्रनीतौ स्पष्टं निगदितं यत् – अर्थोपार्जने अर्थसंरक्षणे च मनुजैः कृपणभावः सेव्यः । परं तद्दाने च विरक्तः आर्जवभावः संसेवनीयः ।

वेदेष्वपि स्पष्टं वर्णितं यत् कृपणस्य धनं निरर्थकम् । तदेव तन्मृत्युः । यदि मृत्युः साक्षाद् न आयाति चेत् प्रतिक्षणं मृत्योः भीतिः । स च पुमान् न यज्ञादिभिः ईश्वरप्रसन्नतायै शक्तः भवति न बान्धवेभ्यः धनदानाय समर्थः भवति । अर्थोपार्जनेन लीनजनेन याचकेभ्यः स्वल्पमपि अवश्यं दातव्यम् । धनसत्त्वेऽपि धनदानं पुण्यकर्म प्रोक्तम् । अर्थस्य व्ययः भोगविलासेषु न भवेत्, पारमार्थिकेषु कार्येषु तदुपयोगः सर्वथा प्रशंस्यः ।

अर्थे एव सर्वेऽपि गुणाः समाहिताः सन्ति । अर्थसत्त्वे तद्दोषा अपि कुत्रचित् गुणाः प्रतीयन्ते । यस्य पार्श्वे धनमस्ति स एव समाजे प्रतिष्ठितः उच्चकुलोत्पन्नः स एव पण्डितः वक्ता गुणवान् दर्शनीयश्च । अत एव भर्तृहरिणा नीतिशतके निरूपितं यत् –

**यस्यास्ति वित्तं स नरः कुलीनः, स पण्डितः स श्रुतवान् गुणज्ञः ।**
**स एव वक्ता स च दर्शनीयः, सर्वे गुणाः काञ्चनमाश्रयन्ति ।।**[2]

वस्तुतः अर्थ एव गुणिषु गुणेषु च आकर्षणस्य केन्द्रस्थानमस्ति । मित्रसम्प्राप्तेः प्राप्तानां मित्राणाञ्च मित्रऋणे बन्धनाय अर्थ एव प्रधानं लक्ष्यम् । यस्य पार्श्वे धनमस्ति तस्य पार्श्वे एव मित्राणि बान्धवाश्च समुपस्थिताः भवन्ति ।

ऐश्वर्यस्य देवी धनसम्पदाप्रयोगेण द्वेधा विभक्ता, लक्ष्मीः श्रीश्च । या सम्पत् स्वपोषणार्थं उपयुक्ता भवति सा लक्ष्मीः । या च सम्पत्तिः विश्वकल्याणाय उपयुक्ता भवति समस्तसमाजम् आश्रयं प्रददाति सा श्रीः ।

वैदिकपरम्परायां चतुर्विधपुरुषार्थेषु द्वितीयं स्थानं बिभर्ति अर्थः । अर्थः स्वस्मिन् विभिन्नानाम् अर्थानां समायोजनं विदधाति । अर्थद्वारेणैव मनुष्याणां स्वाकाङ्काक्षापूर्तिः स्वकामनापूर्तिश्च भवितुमर्हति

। स्वेप्सितस्य पूर्तौ त्रिवर्गेषु वर्णितौ इमौ धर्मकामावपि महत्त्वपूर्णौ वर्तेते । तदर्थं अर्थपुरुषार्थ एव धर्मकामयोः संसाधनात्मकं स्वं रूपं प्रकटयति ।

व्याहारिकं पक्षं पश्यामश्चेत् विनाऽर्थं न धर्मप्राप्तिः न वा कामावाप्तिः । अर्थः सृष्टिविकासे महत्त्वपूर्णं स्थानं धारयति । प्रतिपदं परिवर्तनशीलं समाजं विभिन्नेषु उपायेषु च विकासस्वरूपं प्रापयति एष अर्थः । अतिविकसेऽस्मिन् जगति आवश्यक्तापूर्तिः विभिन्नानां सिद्धान्तानाम् अवाप्तिश्च अर्थद्वारैव शक्या ।

सततं परिवर्तनशीले राजनैतिक आयामेषु च अर्थ एव प्रमुखं कारणम् । यद्यपि मानवः विभिन्नानां साधनानामुपभोगेन स्वशक्तिः वर्धनाय च सततं प्रयत्नशीलः । यस्याङ्काक्षापूर्तिः सञ्जाता सः पुनः वैभवप्राप्त्यर्थं यत्नशीलः वर्तते । अत एव भारतीयमनिषिभिः अर्थपुरुषार्थस्य व्यवस्था व्यवस्थापिता । तैरेव धर्मस्यानन्तरं द्वितीयं प्रधानं साधनं अर्थपुरुषार्थं संस्थापितम् ।

अर्थ एव मानवजीवनस्य केवलं प्रधानं लक्ष्यं न भवेत् तदर्थं भारतीयैः मनिषिभिः महर्षिभिः अर्थप्राक् धर्मस्य व्यवस्था व्यवस्थापिता । अतः आहत्य इदं वक्तुं शक्यते यत् धर्मव्यवस्थायां अर्थस्य आवश्यकता महती वर्तते । परं स अर्थः धर्मानुकुलः भवेत् ।

**पुरुषार्थे च पुरुषस्य अर्थः** अर्थात् पुरुषस्य स्वरूपसिद्धेः पुरुषस्य आश्रयभावसिद्ध्यर्थञ्च अर्थस्य व्यवस्था कृता । पुरुषार्थेषु अर्थ एव मनुष्याणां सात्त्विकं नैतिकं लक्ष्यावाप्तौ साधनत्वं प्रापयति अयमर्थः । पुरुषार्थस्य एतस्यां व्यवस्थायां पुरुषाणां आध्यात्मिकं प्रयोजनं भौतिकं प्रयोजनं संस्थापनाय अर्थ एव परमं लक्ष्यम् । पुरुषार्थस्य संस्कृतौ आध्यात्मिकता केन्द्रवर्ति वर्तते । या च अर्थपुरुषार्थसिद्ध्यर्थं मानवीयजीवनस्य सर्वेषां पक्षाणां समायोजनं विदधाति । भौतिकरूपेण पश्यामश्चेत् मनुष्यव्यवहाराणां विश्लेषणाय वैषिष्टप्रतिपादनाय च अर्थ एव मूलाधारः ।

अर्थः मानवानां कृते द्वेधा रूपं प्रकटयति । प्रथमं स्वेप्सितपूर्तिः स्वजीवनावश्यकतानां पूर्तिश्च । द्वितीयं सामाजिककर्तव्यानां पूर्णतावाप्त्यर्थं स्वस्मिन् विद्यमानस्यार्थस्य सर्वथा त्यागः । अतः विविधेषु एतेषु कार्येषु साधनत्वं प्रस्थापयति एष अर्थः । अर्थस्य मूल्यं धर्मकाममोक्षेषु च प्रत्यक्षरूपेण अप्रत्यक्षरूपेण वर्तत एव । अर्थेन एव नैतिकशक्त्याः उपयोजनं शक्यम् । अर्थमाध्यमेन एव समाजे प्रमुखं स्थानम् अवाप्तुं शक्यते । अत एव सामाजिकं संघर्षमपि मनुष्यः कर्तुं प्रभवति । यद्यपि अर्थः मुख्यतः व्यक्तिगतं मूल्यम् तथापि समाजव्यवस्थायाः चरमं लक्ष्यं भवितुमर्हति ।

देशोन्नतेः देशस्य वैदेशिक सम्बन्धावपि अर्थ एव प्रधानं कारणम् । यथा कामे सार्वभौमभावनासिद्धिः नैसर्गिकी प्रवृत्तिश्च आवश्यकी तथैव अर्थेऽपि । अतः जीवनस्य प्रत्येकस्मिन् पदे प्रत्येकस्मिन् क्षणे च अर्थ निजं स्वरूपं सर्वोत्कृष्टरीत्या प्रस्थापयति ।

सामान्यतः मानवानां रुचिः अर्थप्रधाना कामप्रधाना च यतोहि द्वामिमौ पुरुषार्थौ ह्याकर्षणकेन्द्रस्थानीयौ वर्तेते । अनेन आत्मसुखस्याप्यनुभवः अवाप्तुं शक्यते । यद्यपि अर्थ आवश्यकः पुरुषार्थः तथापि साधनमूल्यत्वम् भवितुमर्हति । उद्देश्यपूर्तौ अर्थ एव सर्वोत्कृष्टं माध्यमं भवितुमर्हति । अतः मनुष्ये विद्यमाना परिग्रहभावना अर्थसंशयभावना च नियन्त्रिता भवेत्, तदर्थं धर्मस्य स्थापना कृता

। यस्मिन् मनुष्यः स्वान्तर्निहितानां शक्तीनां विकसितं स्वरूपं पश्येत् समाजोन्नतेः स्वयोगदानञ्च दद्यात् तच्च अर्थद्वारैव शक्यम् ।

मनुष्यः कर्मशीलस्वभावयुक्तो वर्तते । अतः स्वकामनापूर्तौ अर्थः एव प्रधानत्वं भजति । अर्थकामौ सर्वेष्वपि जीवेषु प्रधानरूपेण भवतः । पुरुषार्थे अर्थस्य व्यवस्था प्रमुखं कारणम् । यतोहि साधनसत्वे पुरुषार्थसिद्धिः । अत्र साधनस्वरूपं अर्थः प्रकटयति ।

साधनभूतौ इमौ कामार्थौ मोक्षधर्मयोः साध्यप्रपूर्तेः निजं स्वरूपं प्रकटयतः । अतः कामार्थौ साधनत्वं प्राप्नुतः धर्ममोक्षौ साध्यत्वञ्च प्रस्थापयन्तः विकसन्तः स्वस्वरूपं विराजेते । अस्माकं मनीषिणः धर्मार्थकाममोक्षेषु साधनसाध्ययोः व्यवहारं प्रकटयित्वा नैतिकं जीवनं जीवनाय उपदेशं प्रयच्छन्ति ।

अर्थः भौतिकजीवनस्य आधारः वर्णितः । अतः सर्वैरपि मानवैः अर्थः संरक्ष्यः । पुराणेष्वपि वर्णितं यत् ये यत्नशीलाः वर्तन्ते ते एव धनं प्राप्तुम् अर्हाः भवन्ति । ये च धनमवाप्नुवन्ति ते एव आनन्दप्राप्तौ क्षमाः भवन्ति । अतः अर्थ एव उद्योगस्य विकासस्य च कारणम् । नैतिकं जीवनं जीवनाय कर्मभिः पुण्यार्जनाय च सामाजिकं कल्याणञ्च अवाप्त्यर्थं अर्थ एव प्रमुखः आधारः भवितुमर्हति ।

अर्थसम्प्राप्तावपि अयमेव हेतुः मानवतासंरक्षणं मनुष्यसेवा कल्याणकामना च । अर्थः यदा साधनत्वे रूपे प्रयुक्तः भवति तदा न काचित् बाधा परं अर्थः यदा साध्यत्वं प्राप्नोति चेत् अर्थादेव अनर्थपरम्परा प्रवहति । अत एव कौटिल्येन अर्थशास्त्रे निरूपितं यत् – अर्थः धर्मानुसारी भवति चेदेव धनसुखं, जीवनसुखं, पूर्णप्राप्तेः मार्गञ्च दर्शयति । यद्येतत् अधर्मानुसारी भवति चेत् अनर्थपरम्परा प्रस्थापयति । अर्थशब्दस्य प्रयोगः आदानप्रदानधनसम्पत्ति-उपभोगसामग्रीषु च जीविकाप्राप्तेः साधनत्वेन कृतो वर्तते ।

व्यवहारिकं जीवनं सम्यकतया जीवनाय अर्थ एव कारणम्। अतः अर्थस्य क्षेत्रं व्याप्तं विस्तृतं च। यथा आत्मनः प्राप्त्यर्थं मोक्षस्य, बुद्धेः प्राप्त्यर्थं धर्मस्य, मनसः प्राप्त्यर्थं कामस्य च आवश्यकता भवति तथैव शरीरसिद्ध्यर्थं अर्थस्य नितराम् आवश्यकता वरीवर्ति ।

अत एव कौटिल्येन त्रिवर्गेषु अर्थ एव परमपुरुषार्थस्वरूपेण वर्णितः । न केवलं तावदेव अपितु कौटिल्येन तु धर्मकामयोः मूलं अर्थ एवेति वर्णितम्। तन्मतानुसारेण पश्यामश्चेत् यस्य प्राप्तौ सर्वेऽपि यत्नशीलाः वर्तन्ते, यं प्राप्तौ सर्वेऽप्याङ्काक्षिणः वर्तन्ते स एव अर्थः । अर्थस्य उत्पादनं, रक्षणं उपभोगश्च सामंज्यस्य स्वरूपेण स्यात् अर्थात् अर्थव्ययः अपि धर्मानुसारी भवेत् । अर्थोपार्जनमपि धर्मानुकुलं भवेत् । धनार्जनमपि धर्मसम्पादनाय समाजकल्याणाय च भवेत् ।

अर्थस्योपयोजनमपि कर्तव्यपूर्णं जीवनजीवनाय भवेत्। तादृशे जीवने च कर्मणां त्यागः न भवेत् । कर्मप्राप्तिश्च धर्मानुकूला भवेत् धनोपार्जने यावान् श्रमः प्राप्तः, येषां च सहायतां प्राप्ता तेभ्यः अवश्यं स्वार्थांशः प्रत्यर्पितव्यः । निराश्रितेभ्यः उपभोगाय अवश्यं दानं देयम् ।

पुरुषार्थयोजनायाम् अर्थस्य सामान्याभिप्रायः अयम् अभिलषितस्य वस्तुनः अवाप्तिः । अतः व्यवहारे अस्माकं सर्वेषां स्वाभाविकी साहजिकी च प्रवृत्तिः दृश्यते । अत एव उच्यते **प्रवृत्तिसाराः मनुजाः**

। अत एव चाणक्यः अपि वर्णयति यत् **अर्थार्थं प्रवर्तते लोकः ।**[3] अर्थात् गतानुगतिकं जगत् वर्तते, तस्मिन् समुपस्थिताः ये जनाः वर्तन्ते तेषां अर्थप्राप्तौ स्वाभाविकी प्रवृत्तिः। अत एव एतस्य पुरुषार्थस्याभिधानं अर्थेति सार्थकतां याति । यतोहि अर्थ्यते सर्वैः इति व्युत्पत्तियोगात् यं प्राप्तुं सर्वेऽपि अभिलाषिणः भवन्ति सैव वास्तविक अर्थः ।

अत एव आचार्येण वात्स्यायनेन वर्णितं यत् – **विद्या-भूमि-हिरण्य-पशु-धान्य-भाण्डोपश्करमित्रादीनाम् अर्जनम् अर्जितस्य विवर्धनम् अर्थः ।**[4] आचार्येण चाणक्येनापि अर्थस्येयं परिभाषा प्रोक्ता – **मनुष्याणां वृत्तिः अर्थः मनुष्यवती भूमिरित्यर्थः ।**[5] अर्थात् अत्र वृत्तिशब्दस्यार्थः जीविकाप्राप्तिः ।

कौटिल्ये कृते अर्थशास्त्रे प्रमुखरूपेण राजनीतिशास्त्रस्य उपदेश वर्णितः। तत्रापि च कौटिल्येन राज्ञः स्वरूपं सर्वोत्कृष्टतया व्यवस्थापितम्। अतः तद्दृष्ट्या भूमिः अर्थात् अर्थशास्त्रस्यावाप्तिः । तत्र च धनधान्यवस्त्रगृहसम्पत्तीनां सम्यक् योगः पदार्थानाञ्च जनयित्री पृथ्वी द्वाविमौ अर्थौ पुरुषार्थेषु अर्थस्यैव स्वरूपं प्रकटयन्तः राजन्ते। यतोहि राज्यं भूमिसंरक्षणाय संवर्धनाय भवितुमर्हति । अत एव उक्तं **अर्थस्य मूलं राज्यम् ।**[6]

अर्थस्याभिप्रायः धर्मसम्पत्तिरपि भवेत्। धनशब्दस्य व्युत्पत्तिः च धिनोतीति यतः अर्थात् सर्वान् तृप्तान् करोति अथवा दधन्तीति धर्मं अर्थात् फलप्रदायकं साधनं धनम् । अर्थः स्वकीयस्य साधनगतस्वभावेन एव इच्छापूर्तौ निजं स्वरूपं प्रकटयति। अतः आकाङ्काक्षापूर्तौ अस्य सम्बन्धः अविनाभावसम्बन्धः। तत्परिणामञ्च आनन्दावाप्तौ निहितमस्ति ।

**सन्दर्भग्रन्थाः-**


(1) कूर्मपुराणम्-29-32, वायुपुराणम्-18-10
(2) नीतिशतकम्-37
(3) चाणक्यसूत्रम्-509
(4) कामसूत्रम्-1-2-9
(5) कौटिल्यार्थशास्त्रम्-15-1
(6) चाणक्यसूत्रम्-3